संस्कृतवार्ता:

22.05.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· लोकसभानिर्वाचनस्य षष्ठ-सप्त-चरणयोः प्रचाराभियानं द्रुतगत्या प्रवर्तते ।

· निर्वाचनायोगेन जे.पी. नड्डा ,मल्लिकार्जुन-खरगे इति एताभ्यां निर्देशः प्रदत्तः यत् तौ दलस्य प्रमुख-प्रचारकेभ्यः एकां सञ्चेतनां प्रकाशयेत् यत् ते एतादृशं वक्तव्यं न दद्युः येन आदर्श-आचार-संहितायाः उल्लङ्घनं स्यात् ।

· भारतीयऋतुविज्ञानविभागेन भारतस्य उत्तरभूतलक्षेत्रेषु मध्यभारते च ताप-तरङ्गानां कारणेन पञ्चविंशति दिनाङ्कं यावत् रेड-अलर्ट इति सञ्चेतना प्रसारिता

· आईपीएल्-क्रिकेट-स्पर्धायाम् अद्य सायं रॉयल्-चैलेञ्जर्स्-बेंगलुरु-दलं राजस्थान-रॉयल्स्-दलं सम्मुखीकरिष्यति ।

<u>लोकसभानिर्वाचनम्</u>

लोकसभानिर्वाचनस्य षष्ठ-सप्त-चरणयोः प्रचाराभियानं द्रुतगत्या प्रवर्तते ।उत्तरप्रदेशे विभिन्नदलानां प्रचारकाः प्रचाराभियाने रताः सन्ति । प्रधानमन्त्री नरेन्द्रमोदी अद्य उत्तरप्रदेशस्य बस्ती-जनपदे एकं राजनीतिक-जनसभां समबोधयत् । प्रधानमन्त्री प्रोक्तवान् यत् भाजपा-दलेन पञ्च-निर्वाचनचरणेषु एव बहुमतं समर्जितम् ।उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः जौनपुर-बस्ती-जनपदयोः प्रचारं कृतवान् । सः सुल्तानपुर,सिद्धार्थनगर, बलरामपुर-जनपदेषु अपि जनसभाः सम्बोधयिष्यति । लोकसभानिर्वाचनस्य सप्तमे चरणे अष्टराज्याणां केन्द्रशासितप्रदेशानां च चतुरधिक-नवशतं प्रत्याशिनः निर्वाचनद्वन्द्वे भागं भजिष्यन्ति ।निर्वाचन आयोगः प्रोक्तवान् यत् सप्त-पञ्चाशत्-लोकसभा-निर्वाचनासनेषु पञ्चोत्तरैकशताधिक-द्विसहस्रं प्रत्याशिनः नामाङ्कनं कृतवन्तः । अन्वीक्षणानन्तरं चतुरधिक-नवशतं नामाङ्कनपत्राणि वैधानि प्राप्तानि । सप्तमचरणाय जूनस्य प्रथमदिनाङ्के मतदानं भविष्यति । पञ्जाबे सर्वाधिकानि अष्टनवत्युत्तर-पञ्चशतानि नामाङ्कनपत्राणि प्राप्तानि । इतः परं उत्तरप्रदेशस्य त्रयोदश-निर्वाचनासनेषु पञ्चनवत्युत्तर-पञ्चशतं नामाङ्कनपत्राणि प्राप्तानि । निर्वाचनस्य अस्मिन् अन्तिमचरणे उत्तर-प्रदेशपञ्जाबयोः त्रयोदश-त्रयोदश, पश्चिमबङ्गालस्य नव, बिहारस्य अष्ट, ओडिशायाः षट्, हिमाचलस्य चत्वारि , झारखण्डस्य त्रीणि, केन्द्रशासित-प्रदेशस्य चण्डीगढस्य एकं च निर्वाचनासनेषु मतदानं भविष्यति । मतगणना जूनमासस्य चतुर्थदिनाङ्के भविष्यति ।

<u>निर्वाचनायोगः-नड्डा</u>

निर्वाचनायोगेन भारतीय-जनता-पार्टीति दलस्य अध्यक्षः जे.पी. नड्डा इत्यस्मै , कांग्रेस्-अध्यक्षः मल्लिकार्जुन-खरगे इत्यस्मै च निर्देशः प्रदत्तः यत् तौ दलस्य प्रमुख-प्रचारकेभ्यः एकां सञ्चेतनां प्रकाशयेत् यत् ते एतादृशं वक्तव्यं न दद्युः येन आदर्श-आचार-संहितायाः उल्लङ्घनं स्यात् । द्वाभ्याम् अध्यक्षाभ्यां प्रेषिते पत्रे , आयोगः प्रोक्तवान् यत् किमपि दलं केऽपि प्रत्याशिनः च एतादृशं भाषणं दद्यात् येन समाजे मतभेदं जायेत् सांप्रदायिकता च प्रवर्धेत्।

भारतीयऋतुविज्ञानविभागः

भारतीयऋतुविज्ञानविभागेन भारतस्य उत्तरभूतलक्षेत्रेषु मध्यभारते च ताप-तरङ्गानां कारणेन आगामि-पञ्चदिनानि यावत् रेड-अलर्ट इति सञ्चेतना प्रसारिता। पञ्जाब, हरियाणा, चण्डीगढ, दिल्ली, उत्तरप्रदेश, राजस्थान, मध्यप्रदेश, केरल चेत्यादिषु राज्येषु अस्य मासस्य पञ्चविंशति-दिनाङ्कपर्यन्तं तीव्र-ताप-तरङ्गस्य स्थितिः निरन्तरं भविष्यति इति भारतीय-ऋतुविज्ञान-विभागेन पूर्वानुमानं कृतम् अस्ति। भारतीय-ऋतुविज्ञान-विभागेन इदमपि अनुमानं प्रकटितं यत् शनिवासरं यावत् अधिकतमं तापमानं चतुश्चत्वारिंशत्-तः षड्चत्वारिंशत् डिग्री सेल्सियस् पर्यन्तं भविष्यति । ऋतु-विज्ञानविभागः प्रोक्तवान् यत् आगामि-दिवसत्रयेषु दक्षिण-भारते तीव्रवृष्टेः सम्भावना अस्ति । उत्तर-पूर्व-अरब-सागर-मालदीव-कन्याकुमारी-दक्षिण-बंगाल-अण्डमान-निकोबार-द्वीप-समूह-क्षेत्रेषु दक्षिण-पश्चिम-मानसून-कारणेन आगामि-दिवसयोः केषुचित्-क्षेत्रेषु वर्षायै अनुकूल-वातावरणं सञ्जातम् । ऋतुविज्ञानविभागः प्रोक्तवान् यत् तमिलनाडु, पुद्दुचेरी, कराइकल,केरल,माहे, कर्नाटक-क्षेत्रयोः आगामि-दिवसत्रयेषु तीव्रवृष्टेः सम्भावना अस्ति ।

नौसेना-प्रमुखः

नौसेना-प्रमुखः एडमिरल्-दिनेश-कुमार-त्रिपाठी सबलम् अकथयत् यत् भारतस्य तटवर्ति-सीम्नः सुरक्षायै भारतीय-नौसेनायाः अस्तित्वम् अत्यावश्यकम् अस्ति । नवदिल्ल्यां ह्यः नौसेना-मुख्यालये श्री-त्रिपाठी आत्मनिर्भरतायै नौसेनायाः प्रतिबद्धतां पुनरुच्चारितवान् । श्रीत्रिपाठीवर्यः समुद्रक्षेत्रे समस्या-समाधानाय नवाचार-प्रौद्योगिक्योः स्वीकरणं सबलं प्रत्यपादयत् । तेन नौसेना-मुख्यालयस्य कर्मचारिणां सुरक्षित-वातावरणेन नौसेनया कृतैः प्रत्युत्तर-कार्याचरणैः च परिचयं कारितम् । नौसेना-प्रमुखः सेवायां समर्पणभावस्य व्यावहारिकताम् उद्दिश्य नौसैन्य-कर्मिणां प्रशंसाम् अपि अकरोत् ।

प्रधानमन्त्री-दीपिन्दर-गोयलः

प्रधानमन्त्री नरेन्द्रमोदी भारतस्य एकस्य बृहत्तम-खाद्य-वितरक-तन्त्रांशस्य संस्थापकः दीपिन्दर-गोयलः इत्यस्य प्रशंसाम् अकरोत्। श्री गोयलस्य सार्वजनिक-संदेश-पटले एकं सन्देशं प्रसारयन् प्रधानमन्त्री अवदत् यत् परिश्रमः महतीं ऊर्ध्वतां प्रति नेतुं शक्नोति । सः अवदत् यत् श्री गोयलस्य जीवनयात्रा असंख्य-युवकान् उद्यमशीलतायाः स्वप्नं साकारं कर्तुं प्रेरयति। सः अवदत् यत् स्टार्टअप-संस्थानां समृद्ध्यर्थं अनुकूलं वातावरणं प्रदातुं सर्वकारः प्रतिबद्धः अस्ति ।

सर्वोच्चन्यायालयः-हेमन्तसोरेनः

सर्वोच्चन्यायालयेन धनशोधन-प्रकरणे नियमित-अस्थायी-विमोचन-याचिका-प्रख्यापनम् अधिकृत्य तथ्यानां निगूढने आपत्तिः प्रकटितः अनन्तरं हेमन्तसोरेनः इत्यनेन प्रवर्तननिदेशालयस्य निगडनं विरुध्य प्रख्यापिता याचना प्रत्यावर्तिता ।

हरदीपसिंहपुरी-दिल्ली

भाजपा-दलस्य वरिष्ठनेता केन्द्रियमन्त्री च हरदीपसिंहपुरी अद्य प्रोक्तवान् यत् तस्य दलं दिल्ल्यां लोकसभायाः सर्वेषु सप्तनिर्वाचनासनेषु विजयम् अधिगमिष्यति ।नवदिल्ल्यां सम्वाददातृभिः सह जाते सम्वादे सः प्रोक्तवान् यत् भाजपा-दलेन राजधान्यां विगतेषु दश-वर्षेषु चतुर्पञ्चाशत्-सहस्र-कोटि-रूप्यकाणां विकास-कार्याणि कृतानि सन्ति । आम आदमी पार्टीति दलस्य कार्यशैलीं विरुध्य अकथयन् श्रीपुरी प्रोक्तवान् यत् अनेन दलेन दिल्ल्याम् आयुष्मान-भारतयोजना-प्रधानमन्त्रीआवासयोजना इति द्वयोः क्रियान्वयनं न कृतम् अपरत्र दिल्ल्याः मुख्यमन्त्रिणा स्वस्मै विलास-वैभव-सम्पन्नं भवनं निर्मितम् ।

अमितशाहः-पश्चिमबंगालः

पश्चिम-बंगालस्य घातलक्षेत्रे अद्य जनसभां सम्बोधयन् भारतीयजनतापार्टीति दलस्य वरिष्ठनेता केन्द्रियमन्त्री च, अमितशाहः प्रोक्तवान् यत् पाकिस्तानाधिकृत-कश्मीरः भारतेन सह अस्ति , भारतेन सह भविष्यति, भारतं पुनरेतं स्वस्वामित्वम् आनेष्यति च ।श्रीशाहः प्रोक्तवान् यत् पश्चिम-बंगालस्य तृणमूल-सर्वकारेण जनाः विकासवञ्चिताः कृताः सन्ति । सः प्रोक्तवान् यत् संदेशखालीक्षेत्रस्य घटनया महिलानाम् आत्मसम्मानं घातितम् अस्ति । इतः पूर्वं श्रीशाहेन कांथीक्षेत्रे जनसभा कृता आसीत् । सः पुरुलिया-बांकुरा-लोकसभा-क्षेत्रयोः द्वे जनसभे सम्बोधयिष्यतः ।

उपराष्ट्रपतिः-तेहरानयात्रा

उपराष्ट्रपतिनः जगदीप-धनखडस्य अद्य तेहरान-नगरे ईरानी-अधिकारिभिः स्वागतं कृतम् । धनखर-महोदयः ईरानी-राष्ट्रपतिः सेय्यद-इब्राहिम-रायसी, विदेशमन्त्री एच.अमीर-अब्दुल्लाहियन च इत्यनयोः निधने शोकं प्रकटितुम् आधिकारिक-समारोहे भागं भजिष्यति।

आईपीएल्

आईपीएल्-क्रिकेट-स्पर्धायाम् अद्य सायं रॉयल्-चैलेञ्जर्स्-बेंगलुरु-दलं राजस्थान-रॉयल्स्-दलं अहमदाबादस्य नरेन्द्रमोदी-स्टेडियम् इत्यत्र सम्मुखीकरिष्यति । क्रीडा सायं सार्धसप्तवादने क्रीडिष्यते ।

।। इति वार्ता: ।।